श्री प्रत्यंगिरा कवचं (जगन्मंगळकं)

श्री प्रत्यंगिरा कवचं (जगन्मंगळकं)

श्रीदेव्युवाच ।
देव देव महादेव सर्वज्ञ करुणानिधे ।
प्रत्यंगिरायाः कवचं सर्वरक्षाकरं नृणां ॥1॥

जगन्मंगळकं नाम प्रसिद्धं भुवनत्रये ।
सर्वरक्षाकरं नृणां रहस्यमपि तद्वद ॥2॥

श्रीशिव उवाच ।
शृणु कळ्याणि वक्ष्यामि कवचं शत्रुनिग्रहं ।
परप्रेषितकृत्यादि तंत्रशल्यादिभक्षणं ॥3॥

महाभिचारशमनं सर्वकार्यप्रदं नृणां ।
परसेनासमूहे च राज्ञामुद्दिश्य मंडलात् ॥4॥

जपमात्रेण देवेशि सम्यगुच्चाटनं भवेत् ।
सर्वतंत्रप्रशमनं कारागृहविमोचनं ॥5॥

क्षयापस्मारकुष्ठादि तापज्वरनिवारणं ।
पुत्रदं धनदं श्रीदं पुण्यदं पापनाशनं ॥6॥

वश्यप्रदं महाराज्ञां विशेषाच्छत्रुनाशनं ।
सर्वरक्षाकरं शून्यग्रहपीडाविनाशनं ॥7॥

बिंदुत्रिकोणं त्वथ पंचकोणं
दळाष्टकं षोडशपत्रयुक्तं ।
महीपुरेणावृतमंबुजाक्षी
लिखेन्मनोरंजनमग्रतोपि ॥8॥

महीपुरात्वूर्वमेव द्वात्रिंशत्पत्रमालिखेत् ।
अंतरे भूपुरं लेख्यं कोणाग्रे क्षां समालिखेत् ॥9॥

भद्रकाळीमनुं लेख्यं मंत्रं प्रत्यंगिरात्मकं ।
भद्रकाळ्युक्तमार्गेण पूज्यां प्रत्यंगिरां शिवां ॥10॥

रक्तपुष्पैः समभ्यर्च्य कवचं जपमाचरेत् ।
सकृत्पठनमात्रेण सर्वशत्रून् विनाशयेत् ॥11॥

शत्रवश्च पलायं ते तस्य दर्शनमात्रतः ।
मासमात्रं जपेद्देवि सर्वशत्रून् विनाशयेत् ॥12॥

अथ कवचं –
यां कल्पयंती प्रदिशं रक्षेत्काळी त्वथर्वणी ।
रक्षेत्कराळात्वाग्नेय्यां सदा मां सिंहवाहिनी ॥13॥

याम्यां दिशं सदा रक्षेत्कक्षज्वालास्वरूपिणी ।
नैर्ऋत्यां रक्षतु सदा मास्मानृच्छो अनागसः ॥14॥

वारुण्यां रक्षतु मम प्रजां च पुरुषार्थिनी ।
वायव्यं रक्षातु सदा यातुधान्यो ममाखिलाः ॥15॥

दंष्ट्राकराळवदना कौबेर्यां बडबनला ।
ईशान्यां मे सदा रक्षेद्वीरांश्चान्यान्निबर्हय ॥16॥

उग्रा रक्षेदधोभागे मायामंत्रस्वरूपिणी ।
ऊर्ध्वं कपालिनी रक्षेत् क्षं ह्रीं हुं फट् स्वरूपिणी ॥17॥

अधो मे विदशं रक्षेत्कुरुकुळ्ला कपालिनी ।
विप्रचित्ता सदा रक्षेत् दिवारात्रं विरोधिनी ॥18॥

कुरुकुळ्ला तु मे पुत्रान् बांधवानुग्ररूपिणी ।
प्रभादीप्त गृहा रक्षेत् मातापुत्रान् समातृकान् ॥19॥

स्वभृत्यान् मे सदा रक्षेत्पायात् सा मे पशून् सदा ।
अजिता मे सदा रक्षेदपराजित कामदा ॥20॥

कृत्या रक्षेत्सदाप्राणान् त्रिनेत्रा काळरात्रिका ।
फालं पातु महाक्रूरा पिंगकेशी शिरोरुहान् ॥21॥

भ्रुवौ मे क्रूरवदना पायाच्चंडी प्रचंडिका ।
श्रोत्रयोर्युगळं पातु तदा मे शंखकुंडला ॥22॥

प्रेतचित्यासना देवी पायान्नेत्रयुग्मं मम ।
मम नासापुटद्वंद्वं ब्रह्मरोचिष्णवमित्रहा ॥23॥

कपोलं मे सदा पातु भृगवश्चाप सेधिरे ।
ऊर्ध्वोष्ठं तु सदा पातु रथस्येव विभुर्धिया ॥24॥

अधरोष्ठं सदा पातु आज्ञातस्ते वशो जनः ।
दंतपंक्तिद्वयं पातु ब्रह्मरूपा कराळिनी ॥25॥

वाचं वागीश्वरी रक्षेद्रसनां जननी मम ।
चुबुकं पातु मेंद्राणी तनूं ऋच्छस्व हेळिका ॥26॥

कर्णस्थानं मम सदा रक्षतां कंबुकंधरा ।
कंठध्वनिं सदा पातु नादब्रह्ममयी मम ॥27॥

जठरं मेंगिरः पुत्री मे वक्षः पातु कांचनी ।
पातु मे भुजयोर्मूलं जातवेदस्वरूपिणी ॥28॥

दक्षिणं मे भुजं पातु सततं काळरात्रिका ।
वामं भुजं वामकेशी परायंती परावती ॥29॥

पातु मे कूर्परद्वंद्वं मनस्तत्वाभिधा सती ।
वाचं वागीश्वरी रक्षेद्रसनां जननी मम ॥30॥

वज्रेश्वरी सदा पातु प्रकोष्ठयुगळं मम ।
मणिद्वयं सदा पातु धूम्रा शत्रुजिघांसया ॥31॥

पायात्करतलद्वंद्वं कदंबवनवासिनी ।
वामपाण्यंगुळी पातु हिनस्ति परशासनं ॥32॥

सव्यपाण्यंगुळी पातु यदवैषि चतुष्पदी ।
नाभिं नित्या सदा पातु ज्वालाभैरवरूपिणी ॥33॥

पंचास्यपीठनिलया पातु मे पार्श्वयोर्युगं ।
पृष्ठं प्रज्ञेश्वरी पातु कटिं पृथुनितंबिनी ॥34॥

गुह्यमानंदरूपाव्यादंडं ब्रह्मांडनायकी ।
पायान्मम गुदस्थानमिंदुमौळिमनः शुभा ॥35॥

बीजं मम सदा पातु दुर्गा दुर्गार्तिहारिणी ।
ऊरू मे पातु क्षांतात्मा त्वं प्रत्यस्य स्वमृत्यवे ॥36॥

वनदुर्गा सदा पातु जानुनी वनवासिनी ।
जंघिकांडद्वयं पातु यश्चजामीश पातु नः ॥37॥

गुल्फयोर्युगळं पातु योऽस्मांद्वेष्टि वधस्व तं ।
पदद्वंद्वं सदाव्यान्मे पदाविस्फार्य तच्छिरः ॥38॥

अभिप्रेहि सहस्राक्षं पादयोर्युगळं मम ।
पायान्मम पदद्वंद्वं दहन्नग्निरिव ह्रदं ॥39॥

सर्वांगं सर्वदा पातु सर्वप्रकृतिरूपिणी ।
मंत्रं प्रत्यंगिरा देवी कृत्याश्च सह्रदो सुह्रत् ॥40॥

पराभिचारकृत्यात्म समिद्धं जातवेदसं ।
परप्रेषितशल्यात्मे तमितो नाशयामसि ॥41॥

वृक्षादि प्रतिरूपात्मा शिवं दक्षिणतः कृधि ।
अभयं सततं पश्चाद्भद्रमुत्तरतो गृहे ॥42॥

भूतप्रेतपिशाचाद्यान् प्रेषितान् जहि मां प्रति ।
भूतप्रेतपिशाचादि परतंत्रविनाशिनी ॥43॥

पराभिचारशमनी धारणात्सर्वसिद्धिदां ।
भूर्जपत्रे स्वर्णपत्रे लिखित्वा धारयेद्यदि ॥44॥

सर्वसिद्धिमवाप्नोति सर्वत्र विजयी भवेत् ।
एकावृत्तिं जपेद्देवि सर्वऋग्जपदा भवेत् ॥45॥

भद्रकाळी प्रसन्नाऽभूदभीष्टफलदा भवेत् ।
बंदीगृहे सप्तरात्रं चोरद्रव्येऽष्टरात्रकं ॥46॥

महाज्वरे सप्तरात्रं उच्चाटे मासमात्रकं ।
महाव्याधिनिवृत्तिः स्यान्मंडलं जपमाचरेत् ॥47॥

पुत्रकार्ये मासमात्रं महाशत्रुत्वमंडलात् ।
युद्धकार्ये मंडलं स्याद्धार्यं सर्वेषु कर्मसु ॥48॥

अस्मिन्यज्ञे समावाह्य रक्तपुष्पैः समर्चयेत् ।
नत्वा न कुर्तु मर्हासि इषुरूपे गृहात्सदा ॥49॥

शास्तालये चतुष्पथे स्वगृहे गेहळीस्थले ।
निखनेद्यं त्रिशल्यादि तदर्थं प्रापयाशुमे ॥50॥

मासोच्छिष्टश्च द्विपदमेतत्किंचिच्चतुष्पदं ।
माज्ञातिरनुजानस्यान्मासावेशि प्रवेशिनः ॥51॥

बले स्वप्नस्थले रक्षेद्यो मे पापं चिकीर्षति ।
आपादमस्तकं रक्षेत्तमेव प्रतिधावतु ॥52॥

प्रतिसर प्रतिधाव कुमारीव पितुर्गृहं ।
मूर्धानमेषां स्फोटय वधाम्येषां कुले जही ॥53॥

ये मे मनसा वाचा यश्च पापं चिकीर्षति ।
तत्सर्वं रक्षतां देवी जहि शत्रून् सदा मम ॥54॥

खट् फट् जहि महाकृत्ये विधूमाग्नि समप्रभे ।
देवि देवि महादेवि मम शत्रून्विनाशय ॥55॥

त्रिकालं रक्ष मां देवि पठतां पापनाशनं ।
सर्वशत्रुक्षयकरं सर्वव्याधिविनाशनं ॥56॥

इदं तु कवचं ज्ञात्वा जपेत्प्रत्यंगिरा ऋचं ।
शतलक्षं प्रजप्त्वापि तस्य विद्या न सिध्यति ॥57॥

मंत्रस्वरूपकवचमेककालं पठेद्यदि ।
भद्रकाळी प्रसन्नात्मा सर्वभीष्टं ददाति हि ॥58॥

महापन्नो महारोगी महाग्रंथ्यादिपीडिने ।
कवचं प्रथमं जप्त्वा पश्चादृग्जपमाचरेत् ॥59॥

पक्षमात्रात् सर्वरोगा नश्यंत्येव हि निश्चयं ।
महाधनप्रदं पुंसां महादुःस्वप्ननाशनं ॥60॥

सर्वमंगळदं नित्यं वांछितार्थफलप्रदं ।
कृत्यादि प्रेषिते ग्रस्ते पुरस्ताज्जुहुयाद्यदि ॥61॥

प्रेषितं प्राप्य झडिति विनाशं प्रददाति हि ।
स्वगृह्योक्तविधानेन प्रतिष्ठाप्य हूताशनं ॥62॥

त्रिकोणकुंडे चावाह्य षोडशैरुपचारतः ।
यो मे करोति मंत्रेण खट् फट् जहीति मंत्रतः ॥63॥

हुनेदयुतमात्रेण यंत्रस्य पुरतो द्विजः ।
क्षणादावेशमाप्नोति भूतग्रस्तकळेबरे ॥64॥

विभीतकमपामार्गं विषवृक्षसमुद्भवं ।
गुळूचीं विकतं कांतमंकोलं निंबवृक्षकं ॥65॥

त्रिकटुं सर्षपं शिग्रुं लशुनं भ्रामकं फलं ।
पंच ऋग्भिः सुसंपाद्य आचार्यसहितः शुचिः ॥66॥

दिनमेक सहस्रं तु हुनेद्ध्यान पुरः सरः ।
सर्वारिष्टः सर्वशांतिः भविष्यति न संशयः ॥67॥

शत्रुकृत्ये चैवमेव हुनेद्यदि समाहितः ।
स शत्रुर्मित्रपुत्रादियुक्तो यमपुरीं व्रजेत् ॥68॥

ब्रह्माऽपि रक्षितुं नैव शक्तिः प्रतिनिवर्तने ।
महत्कार्यसमायोगे एवमेवं समाचरेत् ॥69॥

तत्कार्यं सफलं प्राप्य वांछितान् लभते सुधीः ।
इदं रहस्यं देवेशि मंत्रयुक्तं तवानघे ॥70॥

शिष्याय भक्तियुक्ताय वक्तव्यं नान्यमेव हि ।
निकुंभिळामिंद्रजिता कृतं जय रिपुक्षये ॥71॥

इति श्रीमहालक्ष्मीतंत्रे प्रत्यक्षसिद्धिप्रदे उमामहेश्वर संवादे श्री शंकरेण विरचिते श्री प्रत्यंगिरा कवचं॥